जैंहमानस्य” ऋ० १०।२।६। “दद्दशानपवेः दृश्यमानायुधस्य” भा० अत्र दृश्यमानेति विवरणं कालाविवक्षयेति बोध्यम्

**दद्भि(ग्धि)** अव्य० याच्ञायाम् निघण्टुः। अयं धातुरित्यन्ये।

**दद्रु** पु० ददते कण्डूं दद–रु। रोगभेदे। “सकण्डुरागपिड़कं दद्रुमण्डलमुद्गतम्” भावप्र०। उद्गतं उच्छूनम् कुष्ठशब्दे २१५४ पृ० दृश्यम्। स्वार्थे क। दद्रुक तत्रार्थे शब्दर०। [अमरः २हाकुचे रत्नमा०।

**दद्रुघ्न** पु० दद्रुं हन्ति हन–टक्। १चक्रमर्द्दके (दादमर्द्दन)।

**दद्रुण** त्रि० दद्रू+पामा० अस्त्यर्थे न ह्रस्वश्च। दद्रुरोगयुक्ते अमरः। [भेदे (दाद्)।

**दद्रू** स्त्री दरिद्रात्यनयाङ्गम् दरिद्रा–ऊ नि०। त्वग्रोग-

**दध** दाने धारणे च आ० भ्वा० सक० सेट्। दधते अदधिष्ट।

**दधन्वत्** त्रि० दधि–मतुप् वेदे नि० दधन्नादेशे मस्य वः। दधिविशिष्टे। “अच्छिद्रस्य दधन्वतः सुपर्णस्य दधन्वतः” ऋ० ६।४८।१८। “दधन्वतः दधिमतः” भा०।

**दधि** क्लि० धा–कि द्वित्वम्। १धारणकर्त्तरि किप्रत्ययान्तत्वेन तद्योगे न कर्म्मणि षष्ठी“स्त्वा दधिं सारकमेतदर्चकान्” मुग्ध०। दध–इन्। २दुग्धविकृतिभेदे, (दइ) ३वस्त्रे च न० हेमच०। दधिगुणभेदादिकं भावप्र० उक्तं यथा

“दध्युष्णं दीपनं स्निग्धं कषायानुरसं गुरु। पाकेऽम्लं श्वासपित्तास्रशोथमेदःकफप्रदम्। मूत्रकृच्छ्रे प्रतिश्याये पीनसे विषमज्वरे। अतीसारेऽरुचौ कार्श्ये शस्यते बलशुक्रकृत्। अथ दधिभेदाः। “आदौ मन्दं ततः स्वादु स्वाद्वम्लञ्च ततः परम्। अम्लञ्चतुर्थमत्यम्लं पञ्चमं दधि पञ्चधा। अथ मन्दादीनां लक्षणानि गुणाश्च। मन्दं दुग्धं यदव्यक्तरसं किञ्चिद्घनं भवेत्। मन्दं स्यात् सृष्टविण्मूत्रं दोषत्रयविदाहकृत्। यत्तु स्यग् घनतां यातं व्यक्तं स्वादुरसं भवेत्। अव्यक्ताम्लरसं तत्तु स्वादु विज्ञैरुदाहृतम्। स्वादु स्यादत्यभिष्यन्दि वृष्यं मेदःकफापहम्। वातघ्नं मधुरं पाके रक्तपित्तप्रसादनम्। स्वाद्वम्लसान्द्रं मधुरं कषायानुरसं भवेत्। स्वाद्वम्लस्य गुणा ज्ञेया सामान्यदधिवज्जनैः। यत्तिरोहितमाधुर्य्यं व्यक्ताम्लत्वं तदम्लकम्। अम्लन्तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनम्। तदत्यम्लं दन्तरोमहर्षकण्ठादिदाहकृत्। अत्यम्लं दीपनं रक्तवातपित्तकरं परम्”। गोदधिगुणाः “गव्यं दधि विशेषेण स्वाद्वम्लञ्च रुचिप्रदम्। पवित्रं दीपनं हृद्यं पुष्टिकृत् पवनापहम्। उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम्। माहिषदधिगुणाः। माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत्। स्वादुपाकमभिष्यन्दि वृष्यं गुर्व्वस्रदूषकम्”। छागीदधिगुणाः “आजं दध्युत्तमं ग्राहि लघु दोषत्रयापहम्। शस्यते श्वासकासार्शःक्षयकार्श्येषु दीपनम्”। पक्वदुग्धदधिगुणाः। पक्वदुग्धभवं रुच्यं दधि स्निग्धं गुणोत्तमम्। पित्तानिलापहं सर्व्वधात्वग्निबलबर्द्धनम्। निःसरदुग्धदधिगुणाः। असारं दधि संग्राहि शीतलं वातलं लघु। विष्टम्भि दीपनं रुच्यं ग्रहणीरोगनाशनम्। गालितदधिगुणाः “गालितं दधि सुस्निग्धं वातघ्नं कफकृद्गुरु। बलपुष्टिकरं रुच्यं मधुरं नातिपित्तकृत्। शर्करादिसहितदधिगुणाः। सशर्करं दधि श्रेष्ठं तृष्णापित्तास्रदाहजित्। सगुड़ं वातनुद्वृष्यं वृंहणं तर्पणं गुरु।” अथ रात्रौ दधिभोजननिषेधः। न नक्तं दधि भुञ्जीत नचाप्यघृतशर्करम्। नामुद्गसूपं नाक्षौद्रं नोष्णं नामलकैर्विना। अयमर्थः। रात्रौ दधि न भुञ्जीत भुञ्जीत चेत्तदा घृतशर्करमुद्गसूपं क्षौद्रमुष्णं विनामलकैश्च दधि न भुञ्जीत। तेन घृतशर्करादियुक्तं दधि रात्रावपि भुञ्जीतेत्यर्थः। तथा च। शस्यते दधि नो रात्रौ शस्तञ्चाम्बुघृतान्वितम्। रक्तपित्तकफोत्थेषु विकारेषु तु नैव तत्। तदम्बुघृतान्वितमपि। अथतु विशेषेण विधिनिषेधौ। हेमन्ते शिशिरे चापि वर्षासु दधि शस्यते। शरद्ग्रीष्मवसन्तेषु प्रायशस्तद्विगर्हितम्। अयाविधिना दधिसेवने दोषमाह ज्वरासृक्पित्तवीसर्पकुष्ठपाण्डामयभ्रमान्। प्राप्नुयात् कामलाञ्चोग्रां विधिं हित्वा दधिप्रियः। अथ सरस्य मस्तुनश्च लक्षणं गुणाश्च। दध्नस्तूपरि यो भागो घनः स्नेहसमन्वितः। स लोके सर इत्युक्तो दध्नोमण्डस्तु मस्त्विति। सरः स्वादुर्गुरुर्वृष्यो वातवह्निप्रणाशनः। साम्लोवस्तिप्रशमनः पित्तश्लेष्मविवर्द्धनः। मस्तु क्लमहरं बल्यं लघु भक्ताभिलाषकृत्। स्रोतोविशोधनं ह्लादि कफतृष्णानिलापहम्। अवृष्यं प्रीणनं शीघ्रं भिनत्ति मलसञ्चयम्”।

“दधि सुक्तेषु भोक्तव्यम् सर्व्वञ्च दधिसम्भवम्” मनुः। “विना लवणतोयाभ्यां दधि मासेन जीर्य्यतिः” “कफपित्तकरं दधि” इति वैद्य०।

दधिशब्दस्य दुग्धविकाररूपार्थत्वे क्लीवत्वेन तदर्थे उक्तपुंस्कत्वाभावात् टादावचि न पुंवद्भावः। धारणकर्त्-